कुबेरोऽधिकृस्तस्तेनशंकरेणमहात्मना ।
धनानाधिपत्ये च तं द्रष्टुं रावणोऽत्रवै ।३८।
आगच्छत्त्वरया युक्तः समारुह्यस्ववाहनम् ।
मां दृष्ट्वा चाब्रवीत्क्रुद्धः केबेरोह्यत्रआगतः ।३९।
त्वया दृष्टोऽथवाऽत्रासौकथ्यतामविलम्बितम् ।
किंकार्यं धनदेनाद्यइतिपृष्टोमयाहिसः ।४०।
तदोवाच महातेजा रावणो लोकरावणः ।
मय्यश्रद्धान्वितो भूत्वा विषयात्मासुदुर्मदः ।४१।

शिक्षापयितुमारब्धोमैवंकार्यमितिप्रभो ।
यथाऽहं च श्रियायुक्तआढ्योऽहं बलवानहम् ।
तथा त्वं भव रे मूढ मा मूढत्वमुपार्जय ।४२।

जो अपनी इन्द्रियों के जीतने वाले हैं, परम शान्ति की भावना से युक्त हैं, शिव में ही परम निष्ठा रखने वाले हैं और महान आत्मा वाले हैं उनको ही लिग रूपी भगवान शिव सुलभ हुआ करते हैं आप लोगों को तो वे सुदुर्लभ ही हैं ।३६। उसी समय में ब्रह्मा आदि समस्त देवताओं और महान विद्वान ऋषिगणों ने नन्दी को प्रणाम करके कहा था कि आप वानर के तुल्य मुख वाले किस कारण से हो गये हैं यह सब कथा हमको बतलाइये तथा अन्य जो रावण का तपोबल है उसे भी कहिये ।३७। नन्दीश्वर ने कहा—महात्मा शंकर ने कुबेर को धनों के आधिपत्य में अधिकृत कर दिया था। यहाँ पर उसको देखने के लिए अपने वाहन पर समारूढ़ होकर बड़ी ही शीघ्रता से युक्त होकर यहाँ पर रावण आया था। उसने यहाँ पर मुझको देखकर अत्यन्त क्रोधित होते हुए कहा था कि क्या यहाँ पर कुबेर आया था ? क्या आपने उसको यहाँ पर देखा है ? यह बहुत ही शीघ्र बिना कुछ विलम्ब किये मुझे बतलाओ कि क्या वह यहाँ पर है ? उस समय में मैंने उससे पूछा था कि आज आपको धनद (कुबेर) से क्या काम है ? उस समय में लोक रावण, महान तेजस्वी रावण ने कहा था—मुझसे अश्रद्धा से युक्त होकर विषयों में लिप्त आत्मा वाला तू अतीव सुदुर्भंद हो गया है। मुझे ही आज शिक्षा देना तुमने आरम्भ कर दिया है। हे प्रभो ! ऐसा तुमको नहीं करना चाहिये। जैसा मैं श्री से युक्त हूँ और परम आढ्य हूँ तथा मैं बलवान भी हूँ। रे मूढ़ ! उसी प्रकार का तू भी हो जा और इस मूढ़ता का उपार्जन मत कर ।३८—४२।

अहं मूढः कृतस्तेन कुबेरेणमहात्मया ।
मया निराकृतो रोषात्तपस्तेपे स गुह्यकः ।४३।

कुबेरः स हि नन्दिन्किमागतस्तव मन्दिरम् ।
दीयतां च कुबेरोऽद्यनात्रकार्याविचारणा ।४४।
रावणस्यवचः श्रुत्वाह्यवोचंत्वरितोऽप्यहम् ।
लिंगकोसिमहाभागत्वमहं च तथाविधः ।४५।
उभयोः समतांज्ञात्वावृथाजल्पसि दुर्मते ।
यथोक्तः स त्ववादीन्मां चदनार्थबलोद्धतः ।४६।
यथा ःभवद्भिः पृष्ठोऽह वदनार्थे महात्मभिः ।
पुराबृत्तंमयाप्रोक्तं शिवार्चनविधेः फलम् ।
शिवेन दत्तं सारूप्यं न गृहीतं मया तदा ।४७।
याचितं च मया शंभोर्वदनं वानरस्य च ।
शिवेन कृपया दत्तं मम कारुण्यशालिना ।४८।
निराभिमानिनो ये च निर्दभानिष्परिग्रहाः ।
शम्भोः प्रियास्तेविज्ञेयाह्यन्येशिवबहिष्कृताः ।४९।

उस महात्मा कुबेर के द्वारा मैं मूढ़ बना दिया गया हूँ। जब मैंने रोष से उसका निरादर कर दिया था तो उस गुह्यक (कुबेर) नें तपश्चर्या की थी ।४३। रावण ने कहा—हे नन्दिन ! वह कुबेर आपके मन्दिर में क्यों समागत हुआ था ? आज उस कुबेर को तुम मेरे सुपुर्द कर दो और इस विषय में कुछ भी विचार मत करो ।४४। रावण के इस वचन को सुनकर मैंने तुरन्त ही उससे यह कहा था—हे महाभाग ! आप लिंगक हैं अर्थात् शिव लिंग की उपासना करने वाले हैं और मैं भी उसी प्रकार का उपासक हूँ। हम तुम दोनों की समता का ज्ञान प्राप्त करके भी हे दुर्मते ! यह सब व्यर्थ कह रहे हो। ऐसा ज्यों ही मैंने उससे कहा था वह मुझसे बोला—वदनार्थ में बल से उद्धत हो गया है। महान आतमा वाले आपने जैसा मुझसे वदनार्थ में पूछा है मैंने शिवार्चन की विधि का फल पुरावृत्त कहा है। भगवान शिव ने मुझे अपना सारूप्य प्रदान किया था किन्तु उस समय में मैंने उसे स्वी-

कार नहीं किया था ।४५।४६।४७। मैंने उस समय में भगवान शम्भु से वानर का वहन याचित किया था। करुणाशाली शिव ने कृपा करके मुझे वह प्रदान कर दिया था ।४८। जो अभिमान से रहित हैं, दम्भ से शून्य हैं और परिग्रह हीन होते हैं वे ही लोग भगवान शम्भु के परम प्रिय होते हैं और अन्य जो होते हैं वे शिव के द्वारा बहिष्कृत हुआ करते हैं ।४९।

तथावदन्मया सार्द्धं रावणस्तपसोबलात् ।
मया च याचितान्येवदश वक्त्राणिधीमता ।५०।
उपहासकरं वाक्यंपौलस्त्यस्यतदासुराः ।
मयातदा हि शप्तोऽसौरावणोलोकरावणः ।५१।
ईदृशान्येव वक्त्राणि येषां वै सम्भवति हि ।
तैः समेतो यदाकोऽपिनरवर्यो महातपाः ।
मां पुरस्कृत्य सहसा हनिष्यति न संशयः ।५२।
एवं शप्तोमया ब्रह्मन्रावणो लोकरावणः ।
अर्चितं केवलं लिंगं विना तेन महात्मना ।५३।
पीठिकारूपसंस्थेनविनातेनमुरोत्तमा- ।
विष्णुनाहिमहाभागास्तस्मात्सर्वं विधास्यति ।५४।
देवदेवोमहादेवो विष्णुरूपी महेश्वरः ।
सर्वे यूयंप्रार्थयन्तु विष्णुं सर्वगुहाशयम् ।५५।
अहं हि सर्वं नेवानां पुरोवर्ती भवाम्यतः ।
ते सर्वे नन्दिनोवाक्यं श्रुत्वा मुदितमानसाः ।
वैकुण्ठमागता गीर्भिर्विष्णुं स्तोतुं प्रचक्रिरे ।५६।

तपोबल से रावण ने मेरे साथ उस प्रकार से कहा था कि धीमान् मैंने तो भगवान शम्भु से दशमुखों के हो जाने की याचना की थी। हे सुरगण ! यह उस समय में पौलस्त्य का परम उपहास के करने वाला वाक्य था। उस समय में लोकों को डराने वाले उस रावण को मैंने

शाप दे दिया था। जिनको ऐसे ही मुख हुआ करते हैं, जिस समय में उनसे युक्त महान तपस्वी कोई नरवर्या होंगा वह सहसा मुझको आगे करके मार डालेगा—इसमें कुछ भी संशय नहीं है।५०।५१।५२। इस तरह से मेरे द्वारा शाप दिया हुआ हे ब्रह्मन्! वह लोकरावण रावण था। उसने उस महात्मा के बिना केवल लिङ्ग का ही अर्चन किया था। हे महान भाग वाले सुरोत्तमो! उसने पीठिका रूप संस्थित उस विष्णु भगवान के बिना ही यह समर्चना की थी। अतएव वह विष्णु ही सब कुछ करेंगे। देवों के भी देव महेश्वर विष्णु के स्वरूप वाले महादेव हैं। इसलिए आप सब लोग सबके गुहाशय अर्थात् सबके अन्तर्यामी भगवान विष्णु की प्रार्थना करिये।५३।५४।५५। इसलिए मैं आप सब लोगों के आगे रहने वाला होऊँगा। वे समस्त देवता लोग नन्दी के इस वाक्य का श्रवण कर बहुत ही प्रसन्न मन वाले हो गये थे। फिर वे सभी वैकुण्ठ में समागत हो गये थे और वाणियों के द्वारा भगवान विष्णु की स्तुति करने लगे थे।५६।

नमो भगवते तुभ्यं देवदेव ! जगत्पते ! ।
त्वदाधारमिदं सर्वं जगदेतच्चराचरम् ।५७।

एतल्लिंगंत्वयाविष्णोधृतं वै पिण्डिरूपिणा ।
महाविष्णुस्वरूपेणघातितौ मधुकैटभौ ।५८।

तथा कमठरूपेण धृतो वै मंदराचलः ।
वराहरूपमास्थाय हिरण्याक्षो हतस्त्वया ।५९।

हिरण्यकशिपुर्दैत्यो हतोनृहरिरूपिणा ।
त्वयाचै बलिर्बद्धो दैत्यो वामनरूपिणा ।६०।

भृगूणामन्वये भूत्वा कृतवीर्यात्मजोहतः ।
इतोप्यस्मान्महाविष्णो तथैव परिपालय ।६१।
रावणस्य भयादस्मात्त्रातुं भूयोऽर्हसि त्वरम् ।६२।

एवं संप्रार्थितो देवैर्भगवान्भूतभावनः ।
उवाच च सुरान्सर्वान्वासुदेवो जगन्मयः ।६३।
हे देवाः श्रूयतां वाक्यंप्रस्तावसदृशमहत् ।
शैलादिं च पुरस्कृत्यसर्वे यूयं त्वरान्विताः ।
अवतारान्प्रकुर्वन्तु वानरीं तनुमाश्रिताः ।६४।

देवगण ने कहा—हे देवों के भी देव ! आप तो इस सम्पूर्ण जगत् के स्वामी हैं । भगवान आपके लिए हमारा नमस्कार है । इस सम्पूर्ण चराचर जगत् के आप ही एकमात्र आधार हैं ।५७। हे विष्णो ! पिण्ड रूपी आपने इस लिंग को धारण किया है । महा विष्णु के स्वरूप से आपने मधु और कैटभ दोनों असुरों का हनन किया था ।५८। आपने कमठ रूप से मन्दराचल को धारण किया था तथा आपने वराह के स्वरूप में समास्थित होकर हिरण्याक्ष का वध किया था । नृसिंह के स्वरूप को धारण करके आपने हिरण्यकशिपु दैत्य का हनन किया था और वामन रूपी आपने ही बलि दैत्य को बद्ध किया था । भृगुओं के वंश में जन्म धारण करके कृतवीर्य के पुत्र सहस्रार्जुन का हनन किया था । हे महा विष्णो ! उसी भाँति से यहाँ पर भी हमारी रक्षा आप कीजिए । रावण के इस भय से आप बहुत ही शीघ्र पुनः रक्षा के योग्य होते हैं ।५९।६०।६१।६२। इस प्रकार से देवगणों के द्वारा भूतों पर दया करने वाले भगवान् समस्त देवों से जगन्मय वासुदेव बोले—हे देवगणो ! आपके इस प्रस्ताव के सदृश मेरा महान् वाद्य श्रवण करो । आप सभी लोग अत्यन्त शीघ्रता से समन्वित होते हुए शैलाद को अपने आगे करके वानरी तनु (शरीर) का समाश्रय ग्रहण करते हुए अवतारों को करो ।६३।६४।

अहंहिमानुषो भूत्वा ह्यज्ञानेन समावृतः ।
संभविष्याम्ययोध्यायां गृहे दशरथस्य च ।
ब्रह्मविद्यासहायोऽस्मि भवतां कार्यसिद्धये ।६५।

जनकस्यगृहेसाक्षाद्ब्रह्मविद्याजनिष्यति ।
भक्तो हि रावणः साक्षाच्छिवध्यानपरायणः ।६६।

तपसा महता युक्तो ब्रह्मविद्यां यदेच्छति ।
तदा सुसाध्योभवति पुरुषो धर्मनिर्जितः ।६७।

एवं संभाष्य भगवान्विष्णुः परममङ्गलः ।
बालीचेन्द्रांशसभूतः सुग्रीवोंऽशुभतः सुतः ।६८।

तथा ब्रह्मांशसम्भूतो जाम्बवानृक्षकुञ्जरः ।
शिलादतनयोनन्दीशिवास्यानुचरः प्रियः ।६९।

यो वै चैकादशोरुद्रो हनूमान्स महाऋषिः ।
अवतीर्णः सहायार्थं विष्णोरमिततेजः ।७०।

मैं फिर अज्ञान से समावृत होकर मनुष्य होऊँगा और राजा दशरथ के घर में अयोध्या पुरी में जन्म ग्रहण करूँगा । आप सब लोगों के कार्य की सिद्धि के लिये मैं ब्रह्म विद्या की सहायता वाला होऊँगा । वह ब्रह्म विद्या राजा जनक के गृह में जन्म ग्रहण करेगी । परमभक्त रावण साक्षात् शिव के ध्यान में परायण होकर महान् तपश्चर्या से युक्त जब ब्रह्म विद्या की इच्छा करेगा तो उसी समय में वह धर्म निर्जिता पुरुष सुसाध्य हो जायगा ।६५।६६।६७। परम मंगल स्वरूप भगवान् विष्णु ने इस तरह से कहकर इन्द्र के अंश से सम्भूत बाली, अंशुमान् का पुत्र सुग्रीव का, ऋक्ष कुंजर जाम्बवान् ब्रह्मा के अंश से सम्भूत हुआ । शिलाद का तनय (पुत्र) नन्दी भगवान् शिव का प्रिय अनुचर था जो एकादश रुद्र रूप महा ऋषि था वह हनुमान् हुआ । इसी रीति से अपरिमित तेज धारण करने वाले भगवान् विष्णु की सहायता करने के लिये अवतीर्ण हुए थे ।६७।६६।७०।

मैन्दादयोऽथ कपयस्ते सर्वे सुरसत्तमाः ।
एवं सर्वेसुरगणाअवतेरुर्यथातथम् ।७१।

तथैव विष्णुरुत्पन्नः कौशल्यानन्दवर्द्धनः ।
विश्वस्य रमणाच्चैव राम इत्युच्यते बुधै ।७२।
शेषोऽपि भक्त्या विष्णोश्च तपसाऽवतारद्भवि ।७३।
दोर्दण्डावपि विष्णोश्च अवतीर्णौप्रतापिनौ ।
शत्रुघ्नभरताख्यौ च विख्यातौभुवनत्रये ।७४।
मिथिलाधिपतेः कन्याउक्ताब्रह्मवादिभिः ।
सा ब्रह्मविद्याऽवतरत्सुराणांकार्यसिद्धये ।
सीता जाता लाङ्गलस्य इयं भूमिविकर्षणाद् ।७५।
तस्मात्सीतेति विख्याता विद्या सान्वीक्षिकी तदा ।
मिथिलायां समुत्पन्ना मैथिलीत्यभिधीयते ।७६।
जनकस्य कुले जाता विश्रुताजनकात्मजा ।
ख्याता वेदवती पूर्वं ब्रह्मविद्याऽघनाशिनी ।७७।

वे सब सुरश्रेष्ठ तथा मैन्द आदि ऋषिगण इसी प्रकार से यथा-तथा अवतीर्ण हुए थे । उसी भाँति कौशल्या के आनन्द का वर्द्धन करने वाले भगवान् विष्णु समुत्पन्न हुए थे । समस्त विश्व के रमण कराने से बुधों के द्वारा "राम"—इस नाम से कहे जाते हैं । भगवान् शेष भी विष्णु भगवान् की भक्ति के कारण से तप के द्वारा इस भू-मण्डल में अवतीर्ण हुए थे । प्रतापी दोर्दण्ड भी जो भगवान् विष्णु के थे उस समय में अवतीर्ण हुए थे । वे दोनों दोर्दण्ड भुवनत्रय में भरत और शत्रुघ्न इन दो शुभ नामों से विख्यात हुए थे ।७१।७२।७३।७४। जो मिथिला देश के स्वामी की कन्या थी वह ब्रह्म वादियों के द्वारा बह्मविद्या कही गयी थी जो कि सुरों के कार्य की सिद्धि के लिए अवतीर्ण हुई थी । यह सीता हल के द्वारा भूमि के विकर्षण से समुत्पन्न हुई थीं ।७५। इसी कारण से उस समय में वह आन्विक्षिकी की विद्या "सीता" इस नाम से विख्यात हुई थी । यह मिथिला देश में समुत्पन्न हुई थी इसलिये यह "मैथिली"—इस शुभ नाम से कही जाती है । वह राजा नक जके कुल में समुत्पन्न

हुई थी अतएव वह जनक राजा—इस नाम से विश्रुत हुई थी। यह अश्वों के नाश करने वाली ब्रह्म विद्या पहिले वेदवती—इस नाम से विख्यात हुई थी ।७६।७७।

सा दत्ता जनकेनैव विष्णवे परमात्मने ।७८।
तथाऽथ विद्यया सार्द्धं देवदेवो जगत्पतिः ।
उग्रे तपसिलीनोऽसौविष्णुः परममङ्गलः ।७९।
रावणं जेतुकामो वै रामो राजीवलोचनः ।
अरण्यवासकमरोद्देवानां कार्यसिद्धये ।८०।
शेषावतारोऽपि महांस्तपः परमदुष्करम् ।
ततापपरयाशक्त्या देवानांकार्यसिद्धये ।८१।
शत्रुघ्नो भरतश्चैत्र तेपतुः परमन्तपः ।८२।
यताऽसौ तपसा युक्तः सार्द्धं तैर्देवतागण. ।
सगणं रावणं रामः षड्भिर्मासैरजीहनत् ।
विष्णुना घातितः शस्त्रैः शिवसारूप्यमाप्तवान् ।८३।
सगणः स पुनः सद्यो बन्धुभिः सह सुव्रताः ।८४।

उसको स्वयं राजा जनक ने ही परमात्मा विष्णु को प्रदान किया था ।७८। इसके अनन्तर देवों के देव भगवान् जगत्पति उस विद्या के साथ में परमोग्र तप में यह परम मङ्गल प्रभु लीन हो गये थे। राजीव (कमल) के समान लोचनों वाले भगवान् श्री राम रावण को जीतने की कामना वाले थे। उन्होंने देवगणों के कार्य की सिद्धि के लिये अरण्य का निवास किया था। शेष के अवतार वाले ने भी देवताओं के कार्य की सिद्धि के लिए अपनी पराशक्ति के द्वारा परम दुष्कर एवं महान् तपश्चर्या की थी। शत्रुघ्न और भरत ने भी परम तप का तपन किया था ।७९।८०।८१।८२। इसके उपरान्त देवगणों के साथ तपश्चर्या से युक्त इन भगवान् श्री राम ने छै ही मासों के अन्दर गणों के सहित रावण को मार डाला था। भगवान् विष्णु ने शस्त्रों से उनका

वध किया था। वह रावण भगवान् शिव के स्वरूप्य को प्राप्त हो गया था। हे सुव्रतो ! उसने अपने समस्त बन्धुगणों के साथ तथा अपने गणों के सहित पुनः तुरन्त ही शिव की स्वरूपता प्राप्त कर ली थी।८३।८४।

शिवप्रसादात्सकलं द्वैताद्वैतमवप ह ।
द्वैताद्वैतविवेकार्थमृषयोऽप्यत्र मोहिताः ।
तत्सर्वं प्राप्नुवन्तीह शिवार्चनरता नराः ।८५।
येऽर्चयन्तिशिवंनित्यंलिङ्गरूपिणमेवच ।
स्त्रियोवाऽप्यथवाशूद्राः श्वपचह्यन्त्यवासिनः ।
तं शिवं प्राप्नुवन्त्येव सर्वदुःखोपनाशनम् ।८६।
पशवोऽपि परं याताः किं पुनर्मानुषादयः ।८७।
ये द्विजा ब्रह्मचर्येण तपः परममास्थिताः ।
वर्षैरनेकैर्यज्ञानां तेऽपि स्वर्गपरा भवन् ।८८।
ज्योतिष्टोमो वाजपेयो ह्यतिरात्रादयो ह्यमी ।
यज्ञाः स्वर्गं प्रयच्छन्ति सत्रिणां नात्र संशयः ।८९।
तत्र स्वर्गसुखं भुक्त्वापुण्य क्षयकरं महत् ।
पुण्यक्षयेऽपि यज्वानो मर्त्यलोकं पतन्तिवै ।९०।
पतितानां च संसारे दैवाद्बुद्धिः प्रजायते ।
गुणत्रयमयी विप्रास्तासु तास्विहयोनिषु ।९१।
यथा सत्त्वं संभवति सत्त्वयुक्तभवं नराः ।
राजसाश्च तथा ज्ञेयास्तामसाश्चैव ते द्विजाः ।९२।

उसने भगवान् शिव के प्रसाद से सम्पूर्ण द्वैताद्वैत की प्राप्ति कर ली थी। यह द्वैताद्वैत विवेक ऐसा है जिसको जानने के लिए इस विषय में बड़े-बड़े महर्षि गण भी मोहित हो जाया करते हैं। उस सम्पूर्ण द्वैताद्वैत सिद्धान्त को भगवान् शिव के समर्चन में निरत्र रहने वाले मनुष्य इस संसार में प्राप्त कर लिया करते हैं।८५। जो पुरुष नित्य प्रति लिंग स्वरूप वाले भगवान् शिव का अर्चन किया करते हैं चाहे ये स्त्रियाँ हों

अथवा पुरुष हों, शूद्र हों, श्वपच हों या अन्त्यवासी ही क्यों न हों वे सभी शिव के लिंगार्चन के प्रभाव से समस्त दुःखों के उप नाश करने वाले भगवान् शिव की सन्निधि को अवश्य ही प्राप्त कर लिया करते हैं ।८६। शिव लिंग की अर्चना का प्रभाव तो ऐसा है कि यश गण भी परम पद को प्राप्त कर लिया करते हैं फिर मनुष्य आदि की तो बात ही क्या है ।८७। जो द्विज ब्रह्मचर्य पूर्वक अनेक वर्षों तक यज्ञों के परम तप में समास्थित हैं वे भी स्वर्ग पर ही जाया करते हैं । ज्योतिष्ठोम, वाजपेय और ये अतिरात्रादि यज्ञ सत्र करने वालों को स्वर्ग प्रदान किया करते हैं—इसमें कुछ भी संशय नहीं है । यह स्वर्ग प्राप्ति का सुख महान् पुण्यों के क्षय करने वाला है—इस सुख को भोग कर किये हुए समस्त पुण्य के क्षीण हो जाने पर यज्वागण फिर इसी मर्त्य लोक में पतन प्राप्त किया करते हैं । जब इस संसार में पुनः पतन हो जाता है तो उन पतितों को दैव वश से बुद्धि उत्पन्न हो जाया करती है । वह बुद्धि गुणत्रय मयी होती है । हे विप्रगण ! जिस प्रकार से सत्व सत्व युक्त भव बाल जन्म ग्रहण किया करता है । हे द्विजगण ! वे मनुष्य राजस और तामस ही जानने चाहिए ।८८–६२।

एवं संसारचक्रेऽस्मिन्भ्रमिता बहवो जनाः ।
यदृच्छयादैवगत्या शिवं संसेवते नरः ।६३।
शिवध्यानपराणां च नाराणाँ यतचेतसाम् ।
मायानिरसनंसद्योभविष्यति न चान्यथा ।६४।
मायानिरसनात्सद्यो नश्यत्येव गुणत्रयम् ।
यदागुणत्रयातीतोभवतीति स मुक्तिभाक् ।६५।
तस्माल्लिङ्गार्चनं भाव्यंसर्वेषामपिदेहिनाम् ।
लिङ्गरूपी शिवोभूत्वात्रायते सचराचरम् ।६६।
पुरा भवद्भिः पृष्ठोऽहं लिङ्गरूपीकथंशिवः ।
तत्सर्व कथितं विप्रायाथातथ्येन सम्प्रति ।६७।

कथं गरं भक्षितवाञ्छिवो लोकमहेश्वरः ।
तत्सर्वं श्रूयतां विप्रा यथावत्कथयामि वः ।६८।

इस प्रकार से इस संसार के चक्र में बहुत-से मनुष्य भ्रमण किया करते हैं। दैवगति से यदृच्छा से मनुष्य भगवान् शिव का संसेवन किया करता है। जो नर भगवान् शिव के ध्यान में परायण होते हैं और संयत चित्त वाले होते हैं उनकी माया का सिरसन तुरन्त ही हो जायगा—इसके अतिरिक्त अन्य किसी भी प्रकार से नहीं होता है। जब माया का निरसन हो जाता है तो तुरन्त सत्व, रज, तम इन तीनों गुणों का नाश हो जाया करता है। जब मनुष्य गुणों से अतीत हो जाया करता है तो वह मुक्ति के प्राप्त करने का पूर्ण अधिकारी हो जाता है। इसीलिए समस्त देहधारियों को शिव लिंग का अर्चन अवश्य ही करना चाहिए। लिंग रूपी शिव होकर इस चराचर जगत् का त्राण किया करता है। पहिले मुझसे आप लोगों ने पूछा था कि यह भगवान् शिव लिंग के स्वरूप को धारण करने वाले कैसे हुए थे? हे विप्रगण! वह सभी कुछ इस समय में यथातथ्य रूप से आप लोगों को कह कर बतला दिया है। लोक महेश्वर भगवान् शिव ने गरल का भक्षण कैसे किया था—इस सबको भी हे विप्र वृन्द! आप श्रवण करिये। मैं यथावत् सब आपको बतला रहा हूँ।९३—९८।

९—गुरु की अवज्ञा से इन्द्र का राज्य भङ्ग

एकदा तु सभामध्यआस्थितोदेवराट्स्वयम् ।
लोकपालैः परिवृतोदैश्चऋषिभिस्तथा ।१।
अप्सरोगणसंवीदो गन्धर्वैश्च पुरस्कृतः ।
उपगीयमानविजयः सिद्धविद्याधरैरपि ।२।
तदाशिष्यैः परिवृतो देवराजगुरुः सुधीः ।
आगतोऽसौ महाभागोवृहस्पतिरुदारधीः ।३।

तं दृष्ट्वः सहसाः देवाः प्रणेमुः समुपस्थिताः ।
इन्द्रोपिदृदृशे तत्र प्राप्तं वाचस्पतिंतदा ।४।
नोवाच किञ्चिद्दुर्मेधावचो मानपुरः सरम् ।
नाह्वानं नासनं तस्य न विसर्जनमेवच ।५।
शक्रं प्रमत्तंज्ञात्वाऽथ मदाद्राज्यस्य दुर्मतिम् ।
तिरोधानमनुप्राप्तो वृहस्पतीरुषान्वितः ।६।
गते देवगुरौतस्मिन्विमनस्काऽभवन्सुराः ।
यक्षानागाः सगन्धर्वाॠषयोऽपितथाद्विजाः ।७।

महर्षि लोमश ने कहा—एक बार सभा के मध्य में देवराज इन्द्र स्वयं समास्थित हो रहे थे। उनके चारों ओर लोकपाल, देव और ऋषिगण विराजमान थे। वह अप्सराओं के नृत्य को देखने में मग्न थे गन्धर्वगण आगे गमन कर रहे थे और सिद्ध तथा विद्याधरों के द्वारा उनके विजय यश का गान हो रहा था। उसी समय में शिष्यों के सहित देवराज के सुधी गुरुदेव उदार बुद्धि वाले महाभाग वृहस्पति वहाँ पर समागत हो गये थे ।१।२।३। उनको देखकर सब देवगण सहसा उठ खड़े हुए और सबने उनको प्रणाम किया था। उस समय में वहाँ पर प्राप्त हुए वाचस्पति को इन्द्रदेव ने भी स्वयं देखा था किन्तु उस दुष्ट बुद्धि वाले ने मान पूर्वक उनसे कुछ भी नहीं कहा था। न तो उनका कुछ स्वागत ही किया—न आसन दिया और न उनकी विदाई ही की। इसके अनन्तर वृहस्पति जी ने इन्द्र को राज्य के मद से प्रमत्त दुर्मति समझकर क्रोध से युक्त होकर अपना तुरन्तर ही वहाँ से तिरोधान कर लिया था ।४।५।६। देव गुरु के चले जाने पर समस्त सुरगण बहुत ही उदास हो गये थे। सब यक्ष, नाग, गन्धर्व, ऋषिवृन्द और द्विजगण विमनस्क हो गये थे ।७।

गान्धर्वस्यावसानेतु लब्धसंज्ञोहरिः सुरान् ।
प्रपच्छत्वरितेनैव क्व गतो हि महातपाः ।८।

दद्दैव नारदेनोक्तः　शक्रो देवाधिपस्तथा ।
त्वयाकृताह्यवज्ञा च　गुरोर्नास्त्यत्र संशयः ।६।
गुरोरवज्ञया　राज्यं गतं ते बलसूदन ! ।
तस्मात्क्षमापनीयौऽसौ सर्वभावेन हि त्वया ।१०।
एतच्छ्रुत्वा वचस्तस्यनारदस्य महात्मनः ।
आसनात्सहसोत्थायतैः सर्वैः परिवारितः ।
आगच्छत्त्वरया शक्रो गुरोर्गेहमतन्द्रितः ।११।
पृष्ट्वा तारांप्रणम्यादौ क्व गतो हि महातपाः ।
न जानामीत्युवाचेदं तारा शक्रं निरीक्षती ।१२।
तदा चिन्तान्वितोभूत्वाशक्रः स्वगृहमाव्रजत् ।
एतस्मिन्नन्तरे स्वर्गेह निष्ठान्युद्भुतानि च ।१३।
अभवन्सर्वदुःखार्थे शक्रस्य च महात्मनः ।
पातालस्थेन बलिना ज्ञातं शक्रस्य चेष्टितम् ।१४।
ययौ दैत्यैः परिवृतः पातालादमरावतीम् ।
तदा युद्धमतीवाऽऽसीद्देवानां दानवैः सह ।१५।

गन्धर्वों का गायन जब समाप्त हो गया तो उस समय में इन्द्र को कुछ होश आया था और उसने देवताओं से शीघ्र ही पूछा था—महान तपस्वी गुरुदेव कहाँ चले गये हैं ? उसी समय में देवर्षि नारदजी ने देवों के स्वामी इन्द्रदेव से कहा था—तुमने गुरु की अवज्ञा की है—इसमें कुछ भी संशय नहीं है। हे बलसूदन ! तेरा राज्य गुरुदेव की अवज्ञा से गया है। इसलिए आपको अब सर्वतोभाव से उनसे श्चम्तमन कराना चाहिए। महात्मा श्री नारदजी के इस वचन का श्रवण करके वह अपने आसन से सहसा समुत्थित हो गया था और उन सबके द्वारा पारिवारित होता हुआ बड़ी ही शीघ्रता के साथ इन्द्र अतन्द्रित होकर गुरुदेव के घर में आया था। सर्व प्रथम गुरु पत्नी तारा को प्रणाम करके उसने पूछा था—महान तपोमूर्ति गुरुदेव इस समय में

कहाँ चले गये है ? तारा ने इन्द्र को देखते हुए यही उत्तर दिया था कि मैं नहीं जानती हूँ । उस समय में परम चिन्ता से समन्वित होकर इन्द्र वापिस अपने घर में आ गये थे । इसी बीच में स्वर्ग अत्यद्भुत अनिष्ट हुए थे जो सब प्रकार के दुःखों के लिए ही महात्मा इन्द्र को हुये थे । पाताल में स्थित बलि ने इन्द्र की इस दुश्चेष्टा को समझ कर वह पाताल से दैत्यों से परिवृत्त होता हुआ अमरावती में गया था । उस समय में देवों का दानवों के साथ अतीव घोर युद्ध हुआ था ।८–१५।

देवाः पराजिता दैत्यैः राज्यं शक्रस्य तत्क्षणात् ।
सम्प्राप्त सकलं तस्य मूढस्य च दुरात्मनः ।१६।
नीतं सर्वप्रयत्नेन पातालं त्वंरितं गताः ।
शुक्रप्रसादात्ते सर्वे तथा विजयिनोऽभवन् ।१७।
शक्रोऽपि निःश्रिकोजातोदेवैस्त्यक्तस्ततौभृशम् ।
देवीतिरोधानगताबभूव कमलेक्षणा ।१८।
ऐरावतो महानागस्तर्थवोच्चैः श्रवा हयः ।
एवमादीनि रत्नानिअनेकानि बहून्यपि ।१९।
नीतानिसहसादैत्यैर्लोभादसाधुवृत्तिभिः ।
पुण्यभाञ्जि च तान्येवपतितानि च सागरे ।
तदा स विस्मयाविष्टो बलिराह गुरुम्प्रति ।२०।
देवान्निर्जित्य चास्माभिरानीतानिबहूनि च ।
रत्नानि तु समुद्रेऽथपतितानि तदद्भुतम् ।
बलेस्तद्वचनं श्रुत्वा उशना प्रत्युवाच तम् ।२१।

दैत्यों के द्वारा सब देवगण पराजित हो गये थे ओर दुरात्मा महामूढ़ इन्द्र का सम्पूर्ण राज्य दैत्यों ने प्राप्त कर लिया था । वे सब राज्य के सम्पूर्ण वैभव को लेकर शीघ्र ही वापिस पाताल लोक को चले गये थे । दैत्यों के गुरुदेव शुक्राचार्य के प्रभाव से वे सब दैत्यगण विजयी हो गये थे । इन्द्र भी श्रीहीन हो गया था और समस्त देवों के द्वारा

वह अत्यन्त त्याग दिया गया था। कमलेक्षणा देवी भी तिरोधानगत हो हो गई थी अर्थात् वहाँ से छिपकर लुप्त हो गई थी। महानाग ऐरावत तथा उच्चैः श्रवा अश्व आदि इस प्रकार से अनेक बहुत से रत्न भी सहसा दैत्यों ने जो असाधु चरित्र वाले थे लोभ से ले लिए थे। ये सब रत्न परम पुण्यात्म के ही उपभोग करने के योग्य थे इसलिए वे सब सागर में पतित हो गये थे। उस समय में अतीव विस्मय से समाविष्ट होकर राजा बलि ने गुरुदेव शुक्राचार्य जी से कहा था।१६-२०। हे गुरुदेव! देवों को युद्ध में जीतकर हमने ये सब रत्न बहुत से प्राप्त किये थे किन्तु ये सभी रत्न समुद्र में गिर गये हैं—यह एक बहुत ही अद्भुत घटना है। दैत्यराज बलि के इस वचन का श्रवण करके शुक्राचार्य ने उसको इसका उत्तर दिया था।२१।

अश्वमेधशतेनैव सुरराज्यं भविष्यति।
दीक्षितस्य न सन्देहस्तस्माद्भोक्ता स एवच।२२।
अश्वमेध विना किञ्चित्स्वर्गं भोक्तुं न पार्यते।२३।
गुरोर्वचनमाज्ञाय तूष्णींभूतो बलिस्ततः।
बभूव देवैः सार्द्धं च यथोचितमकारयत्।२४।
इन्द्रोऽपिशोच्यतांप्राप्तोजगाम परमेष्ठिनम्।
विज्ञापयामासत थासर्वं राज्यभयादिकम्।
शक्रस्य वचनं श्रुत्वा परमेष्ठी उवाच ह।२५।
संमिलित्वा सुरान्सर्वांस्त्वया साकं त्वरान्विताः।
आराधनार्थं गच्छामो विष्णुं सर्वेश्वरेश्वरम्।२६।
तथेति गत्वा ते सर्वेशक्राद्यालोकपालकाः।
ब्रह्माणं च पुरस्कृत्य तटं क्षीरार्णवस्य च।२७।
प्राप्योपविश्य ते सर्वे हरिं स्तोतुंप्रचक्रमुः।२८।

सौ अश्वमेध यज्ञों के करने पर ही सुर राज्य के वैभव का आनन्द प्राप्त होगा जबकि इस प्रकार से दीक्षित तुम हो जाओगे।

इसमें कुछ भी सन्देह नहीं है। इससे इन समस्त रत्नों का भोक्ता वह ही होता है जो सौ अश्वमेध कर लिया करता है। बिना अश्वमेध यज्ञ के स्वर्ग का सुख भोग नहीं किया जा सकता है ।२२।२३। गुरुदेव के इस वचन का श्रवण करके फिर दैत्यराज बलि चुप हो गया था और देवों के साथ उसने यथोचित व्यवहार कराया था।२४। देवराज इन्द्र भी परम शोक को प्राप्त होकर परमेष्ठी ब्रह्माजी के पास गया था और वहाँ जाकर सब राज्य भय आदि की घटना का समाचार सुनाया था। इंद्र-देव के इस वचन को सुनकर ब्रह्माजी ने कहा—।२५। अत्यन्त शीघ्रता से समन्वित होकर समस्त सुरों के साथ मिलकर सर्वेश्वरेश्वर भगवान् विष्णु की समाराधना करने के लिए चलें। ऐसा ही करना चाहिए—यह विचार कर वे सब इन्द्र आदि लोकपाल जाकर ब्रह्माजी को अपना अग्रगामी बना कर क्षीर सागर के तट के समीप में प्राप्त हो गये थे। वहाँ पर बैठकर उन सबने श्री हरि का स्तवन करना आरम्भ कर दिया था। २६–२७–२८।

देवदेव जगन्नाथ सुरासुरनमस्कृत ।
पुण्यश्लोकाव्ययानन्त परमात्मन्नमोऽस्तुते ।२९।
यज्ञोऽसि यज्ञरूपोऽसियज्ञांगोऽसि रमापते ।
ततोऽद्य कृपयाविष्णोदेवानां वरदोभव ।३०।
गुरोरवज्ञयाचाद्य भ्रष्टराज्यः शतक्रतुः ।
जातः सुरर्षिभिः साकं तस्मादेनं समुद्धर ।३१।
गुरोरवज्ञया सर्वं नश्यतीति किमद्भुतम् ।
ये पापिनोह्यधर्मिष्ठाः केवलं विषयात्मकाः ।
पितरौ निन्दितौ यैश्च निर्दैवास्ते न संशयः ।३२।
अनेन यत्कृतं ब्रह्मन्सद्यस्तत्फलमागतम् ।
कर्मणा चास्य शक्रस्य सर्वेषां संकटागमः ।३३।

विपरीतो यदा काल: पुरुषस्य भवेत्तदा ।
भूतमैत्रीं प्रकुर्वन्ति सर्वकार्यार्थसिद्धये ।३४।
तेन वै कारणेनेन्द्र मदीयं वचनं कुरु ।
कार्यहेतोस्त्वया कार्यो दैत्यैः सह समागमः ।३५।

ब्रह्माजी ने कहा—हे देवों के भी देव ! आप तो इस जगत् के स्वामी हैं । सुर और असुर सभी आपको नमस्कार करते हैं । हे पुण्य श्लोक ! आप विनाश रहित हैं और अनन्त स्वरूप वाले है । हे परमात्मन् ! आपको हम सबका नमस्कार है ।२९! आप यज्ञ स्वरूप हैं और स्वयं ही साक्षात् यज्ञ हैं । हे रमायते ! आप यज्ञ के अङ्ग हैं । इसलिए हे विष्णो ! आज अपनी परम कृपा करके इन समस्त देवों को वरदान देने वाले हो जाइये । अव अपने गुरुदेव की अवज्ञा करने के कारण इन्द्र अपने राज्य से भ्रष्ट हो गए हैं । यह सुर्षियों के सहित अत्यन्त ही हीन दशा को प्राप्त हो गया है । इसलिए आप अव कृपा करके इसका उद्धार कर दीजिये ।३०।३१। श्री भगवान ने कहा—गुरु की अवज्ञा करने से सभी कुछ नाश को प्राप्त हो जाया करता है—इसमें अद्भुत क्या बात है । जो पापी और अधर्म्मिष्ठ हैं तथा केवल विषयात्म ही हैं अर्थात् विषयों के उपभोग करने में ही लिप्त रहा करते हैं और जिन्होंने अपने माता-पिता की निन्दा की है वे निर्दैव अर्थात् भाग्यहीन ही होते हैं—इसमें कुछ भी संशय नहीं है ।३२। इस इन्द्र ने जो कुछ भी किया है उस कर्म का तुरन्त ही इसे फल भी प्राप्त हो गया है । इस इन्द्र के ही इस दुष्कर्म्म से आप सभी को सङ्कट प्राप्त हो गया है ।३३। जिस समय में पुरुष का विपरीत काल आकर उपस्थित हो जावे वे उस समय में समस्त कार्यों की अर्थ-सिद्धि के लिए मनुष्य भूत मैत्री अर्थात् समस्त प्राणि मात्रों से मित्रता का व्यवहार करना चाहिये । हे इन्द्र ! इस कारण से अब तुम मेरा वचन स्वीकार करो । कार्य के हेतु से तुमको दैत्यों के साथ समागम कर लेना चाहिये ।३४-३५।

एवं भगवताऽऽदिष्टः शक्रः परमबुद्धिमान् ।
अमरावतीं ययौहित्वा सुतलं दैवतैः सह ।३६।
इन्द्रं समागतं श्रुत्वा इन्द्रसेनो रुषान्वितः ।
बभूव सह सैन्येन हन्तुकामः पुरन्दरम् ।३७।
नारदेन तदा दैत्या बलिश्च बलिनां वरः ।
निवारितस्तद्वधाच्च वाक्यैरुच्चावचैस्तथा ।३८।
ऋषेस्तस्यैव वचनात्त्यक्तमन्युर्बलिस्तदा ।
बभूव सह सैन्येन आगतो हि शतक्रतुः ।३९।
इन्द्रसेनेन दृष्टोऽसौ लोकपालैः समावृतः ।
उवाच त्वरयायुक्तः प्रहसन्निव दैत्यराट् ।४०।
कस्मादिहागतः शक्र ! सुतलं प्रतिकथ्यताम् ।
तस्यैतद्वचनंश्रुत्वास्मयमानउवाचतम् ।४१।
वय कश्यपदायादा यूयं सर्वे तथैव च ।
यथा वयं तथा यूयं विग्रहोहि निरर्थकः ।४२।
मम राज्य क्षरोनैव नीतं दैववशात्त्वया ।
तथा ह्येतानि तान्येव रत्नानि सुबहून्यपि ।
गतानि तत्क्षणादेव यत्नानीतानि वै त्वया ।४३।

परम बुद्धिमान इन्द्र ने इस भाँति भगवान के द्वारा समादिष्ट होकर अपनी अमरावती का त्याग करके वह देवगणों के साथ सुतल को चले गये थे। वहाँ पर इन्द्र को समागत सुनकर इन्द्रसेन क्रोध से युक्त होकर इन्द्र को हनन करने की कामना वाला होकर अपनी सेना के साथ हो गया था। उस समय में देवर्षि नारद के द्वारा दैत्यगण और बलियों में परम श्रेष्ठ बलि को उसके बध से ऊँचे-नीचे वाक्यों के द्वारा निवारित कर दिया गया था। उस समय में उसी ऋषि के वचन से राजा बलि ने अपना क्रोध त्याग दिया था। इन्द्र अपनी सेना के साथ-समागत हुआ था। इन्द्रसेन ने लोकपालों से उसे समावृत देखा था। यह

दैत्यराज बहुत ही शीघ्रता के साथ हँसते हुए ही यह बोला था। हे इन्द्र ! आप इस सुतल लोक मे किस कारण में समागत हुए हैं— यह बतलाइये। उसके इस वचन को श्रवण करके मुस्कराते हुए इन्द्रदेव ने उससे कहा था।३६-४२। हम सभी लोग महर्षि कश्यप के दामाद हैं और आप भी सब लोग उसी भाँति के हैं। जैसे हम हैं वैसे ही आप भी सब लोग हैं। हमारे आपके बीच में विग्रह निरर्थक ही है। दैव वश से एक ही क्षण में आपने मेरा सम्पूर्ण राज्य ले लिया था। उसी भाँति से बहुत से वे ही रत्न हैं जो आपने ही बड़े यत्न से समानीत किये थे। वे सभी उसी क्षण में चले गये हैं।४३।

तस्माद्विमर्शः कर्तव्यः पुरुषेणविपश्चिता।
विमर्शाज्जायते ज्ञानं ज्ञानान्मोक्षो भविष्यति।४४।
किंतु मे वत उक्तेन जाने नच तवाग्रतः।
शरणार्थी ह्यहं प्राप्तं सुरैः सहतवान्तिकम्।४५।
एतच्छ्रुत्वा तु शक्रस्यवाक्यंवाक्यविदा वरः।
प्रहस्योवाचमतिमाञ्छक्रं प्रतिविदांवरः।४६।
त्वमागतोऽसि देवेन्द्र ! किमर्थं तन्न वेद्म्यहम्।४७।
शक्रस्तद्वचनं श्रुत्वा ह्यश्रुपूर्णाकुलेक्षणः।
किञ्चिन्नोवाच तत्रैनं नारदो वाक्यमब्रवीत्।४८।
बले त्वं किनजानासिकार्याकार्यविचारणाम्।
धर्मो हि महतामेषशरणागतपालनम्।४९।
शरणागतं च विप्रं च रोगिणं वृद्धमेव च।
य एतान्न च रक्षन्ति ते वै ब्रह्महणा नराः।५०।
शरणागतशब्देन आगतस्तव सन्निधौ।
संरक्षणाय योग्यश्च त्वया नास्त्यत्र संशयः।
एवमुक्तो नारदेन तदा दैत्यपतिः स्वयम्।५१।

इसलिए विद्वान पुरुष के द्वारा विमर्श अवश्य ही करना चाहिए। विमर्श करने से ज्ञान की उत्पत्ति होती है और ज्ञान प्राप्त हो जाने पर ही मोक्ष होगा ।४४। किन्तु मेरा यह कथन ही है इससे क्या होगा। मैं तो आपके आगे कुछ भी नहीं जानता हूँ। मैं तो सब देव वृन्दों के साथ आपके समीप में शरणार्थी होकर ही प्राप्त हुआ हूँ ।४५। वाक्यों के ज्ञाताओं में परम श्रेष्ठ और विद्वानों में उत्तम वह मतिमान इन्द्र के इस वचन का श्रवण कर हंसते हुए इन्द्रदेव से यह बोला—हे देवेन्द्र ! तुम यहाँ किस प्रयोजन से आये हो-यह मैं नहीं जानता हूँ ।४६।४७। इन्द्र ने उसके इस वचन का श्रवण करके आँसुओं से अपनी भर कर कुछ भी न बोला वहाँ पर इससे देवर्षि नारदजी ने यह वचन कहा था–।४८। हे बले ! क्या आप कार्य (करने के योग्य) और अकार्य (न करने के योग्य) की विचारणा को नहीं जानते हो ? महान् पुरुषों का यही धर्म्म होता है कि जो भी कोई शरणागत हो उसका पूर्ण पालन करे। अपनी शरण में समागत, विप्र, रोगी और वृद्ध पुरुष, इनकी जो रक्षा नहीं करता है वे मनुष्य ब्राह्मण ही हुआ करते हैं। यह इन्द्र तो शरणागत शब्द से आपकी सन्निधि में प्राप्त हुआ है और आप इसके संरक्षण के लिए परम योग्य भी हैं–इसमें कुछ भी संशय नहीं है। इस प्रकार से जब श्री नारद जी के द्वारा दैत्यपति से कहा गया था तब उसने स्वयं विचार किया था ।४९–५१।

विमृश्य परया बुद्धया कार्याकार्यविचारणम्।
शक्र प्रपूजयामास बहुमानपुरः सरम्।
लोकपालैः समेतं च तथा सुरगणैः सह ।५२।
प्रत्ययार्थं च सत्त्वानि ह्यनेकानि व्रतानि वै।
बलिप्रत्ययभूतानि च चकार पुरन्दरः ।५३।
एवं स समयं कृत्वाशक्रः स्वार्थपरायणः।
बलिना सहचावात्सीदर्थशास्त्रपरो महान् ।५४।

एवं निवसतस्तस्य सुतलेऽपि शतक्रतोः ।
वत्सपा बहवोह्यासंस्तदा बुद्धिमकल्पयत् ।
संस्मृत्य वचनं विष्णोर्विमृश्य च पुनः पुनः ।५५।
एकदातु सभामध्यआसीनोदेवराट् स्वयम् ।
उवाचप्रहसन्वाक्यंबलिमुद्दिश्यनीतिमान् ।५६।

दैत्यों के राजा बलि ने अपनी पराबुद्धि से कार्याकार्य के विचार का विमर्श करके फिर उसने बहुमान पूर्वक इन्द्र की पूजा की थी और समस्त लोकपालों एवं सुरगणों का भी परम समादर किया था ।५२। उस इन्द्रदेव ने दैत्यराज बलि के विश्वास के स्वरूप वाले उसके विश्वास को समुत्पन्न करने के हीं लिए उस इन्द्रदेव ने अनेक सत्व व्रतों को उस समय वहाँ पर किया था । इस प्रकार से परम स्वार्थ में परायण इन्द्र ने सन्धि करके महान अर्थशास्त्र में परायण वह पुरन्दर वहीं पर बलि दैत्यराज्य के साथ ही निवास करने लग गया था ।५३।५४। इस रीति से सुतल लोक में दैत्यों के राजा बलि के साथ निवास करते हुए उस इन्द्र देवराज को बहुत से वर्ष व्यतीत हो गये थे । उस समय में फिर उसने असनी बुद्धि से विचार किया था । जबकि भगवान विष्णु के कहे वचनों का उसे संस्मरण हुआ था और बारम्बार उसने उस पर विचार किया था । एक बार वह देवराज स्वयं सभा के मध्य में विराजमान थे । उस परम नीति में निपुण इन्द्र ने उस समय में दैत्यराज बलि का उद्देश करके हँसते हुए यह वाक्य कहा था ।५५।५६।

प्राप्तव्यान्त्रित्वयावीरअस्माकं च त्वयाबले ।
गजादीनिबहून्येव रत्नानि विविधानि च ।५७।
गतानि तत्क्षणादेवसागरेपतितानि वै ।
प्रयत्नो हि प्रकर्तव्योह्यस्माभिस्त्वरयान्वितैः ।५८।
तेषां चोद्धरणे दैत्य रत्नानामिह सागरात् ।
तर्हि निर्मथनं कार्यंभवताकार्यसिद्धये ।५९।

वलिः प्रवर्तितस्तेनशक्रेण सुरसूदनः ।
उवाच शक्रं त्वरितः केनेदं मथनं भवेत् ।६०।
तदा नभोगतावाणीमेघगंभीरनिः स्वना ।
उवाच देवादैत्याश्च मन्थध्वं क्षीरसागरम् ।६१।
भवतां बलवृद्धिश्च भविष्यति न संशयः ।६२।
मन्दरश्चैवमन्थानंरज्जुं कुरुतवासुकिम् ।
पश्चाद्देवाश्चदैत्याश्चमेलयित्वाविमथ्यताम् ।६३।
नभागतां च तां वाणींनिशम्याथतदा सुराः ।
दैत्यैः सार्द्धततः सर्व उद्यम चक्रुरुद्यताः ।६४।

हे दैत्यराज बले ! आप तो बड़े ही वीर पुरुष हैं हमारे जो रत्न हैं वे आपको अवश्य ही प्राप्त कर लेने चाहिये । ऐरावत आदि वहुत से अनेक परम सुन्दर रत्न विद्यमान हैं । वे सव चले गये हैं और सागर में जाकर पतित हो गये हैं । अब उनको प्राप्त करने के लिए हम सभी को बहुत ही शीघ्रता के साथ अवश्य ही प्रयत्न करना चाहिए । हे दैत्यराज ! उन रत्नों का सागर से उद्धरण करने के लिए अब आपको कार्य सिद्धि के लिए समुद्र का निर्मथन करना ही चाहिये । ।५७।५८।५९। वह सुर सूदन दैत्यराज बलि उस इन्द्रदेव के द्वारा प्रवर्त्तित किया गया था और वह फिर इन्द्र से बोला था कि वह निर्मथन बहुत ही शीघ्रता से होने वाला किसके द्वारा होगा ।६०। उस समय में मेघ के समान परम गम्भीर ध्वनि वाली आकाश गामिनी वाणी ने कहा था—"हे देववृन्द ! और हे दैत्यगण ! अब आप लोग क्षीर सागर का मन्थन करो इसके करने से आप लोगों के बल की वृद्धि होगी—इसमें तनिक भी संशय नहीं है । आप लोग इस क्षीर सागर के मन्थन करने के लिए मन्दराचल को मन्थन बनाइये और वासुकि सर्पराज को उसकी रज्जु करिये । इसके पश्चात देवता और दैत्यगण सब मिलकर सागर का मन्थन करो । इस तरह कथित नभोगत वाणी

को उसी समय में श्रवण कर देवों ने दैत्यों के साथ मिलकर उद्यत होते हुए सबने मन्थन करने के लिए उद्यम किया था।६१—६४।

१०— लक्ष्मी देवी का आविर्भाव

पुनः सर्वे सुसंरब्धाममन्थुः क्षीरसागरम् ।
मथ्यमानात्तदा तस्मादुदधेश्च तथाऽभवत् ।१।
कल्पवृक्षः परिजातश्चूतः सन्तानकस्तथा ।
तान्द्रुसानेकतः कृत्वा गन्धर्वनगरोपमान् ।
ममन्थुरुग्र त्वरिताः पुनः क्षीरार्णवं बुधाः ।२।
निर्मथ्यमानादुदधेरभवत्सूर्यवर्चसम् ।
रत्नानामुत्तमं रत्नं कौस्तुभाख्यं महाप्रभम् ।३।
स्वकीयेन प्रकाशेन भासयन्तं जगत्त्रयम् ।
चिन्तामणिपुरस्कृत्य कौस्तुभं ददृशुर्हिते ।४।
सर्वेसुराददुस्तं वै कौस्तुभंविष्णवेतदा ।
चिन्तामणिततः कृत्वा मध्ये चैवसुरासुराः ।
ममन्थुः पुनरेवाब्धिं गर्जन्तस्ते बलोत्कटाः ।५।
मथ्यमानात्ततस्तस्मादुच्चैः श्रवाः समुद्भुतम् ।
बभूव अश्वोरत्नानां पुनश्चैरावतो गजः ।६।
तथैवगजरत्नं च चतुःषष्ट्यासमन्वितम् ।
गजानांपाण्डुराणां च चतुर्द्दन्तमदान्वितम् ।७।

महर्षि लोमश जी ने कहा—फिर सभी देव और दैत्यगण ने सुसंरब्ध होकर उस क्षीर सागर का मन्थन किया था। उस समय में मन्थन किये गये उस सागर से उस प्रकार से हुआ था कि कल्प, वृक्ष, पारिजात, सन्तानक, चूत ये वृक्ष समुत्पन्न हुये थे। उन सब द्रुमों को एक जगह करके जो गन्धर्व नगर के तुल्य थे फिर देवगण ने बहुत ही शीघ्र ताशाली होकर उग्रता से उस क्षीर सागर का मंथन किया था।

।१।२। उस निर्मथ्यमान सागर से सूर्यदेव के समान वर्चस वाला समस्त रत्नों में परम श्रेष्ठ रत्न महती प्रभा से समन्वित कौस्तुभ नाम वाला समुत्पन्न हुआ था। अपने प्रकाश से तीनों भुवनों को भासित करते हुए चिन्तामणि रत्न को आगे करके उन्होंने कौस्तुभ को देखा था। सब सुरों ने उस कौस्तुभ मणि को उसी समय भगवान विष्णु को समर्पित कर दिया था। इसके अनन्तर चिन्तामणि को मध्य में करके उन सुर और असुरों ने जो परम वल से उत्कट थे गर्जना करते हुये फिर उस सागर का मन्थन किया था।३।४।५। इसके उपरान्त मन्थन किए गये उस समुद्र से उच्चै: श्रवा अश्व समुद्भुत हुआ था जो एक उन रत्नों में से था। इसके पश्चात् ऐरावत हाथी समुत्पन्न हुआ था।६। उसी प्रकार से चौंसठ से समन्वित गजरत्न जो पाण्डुर गजों में चतुर्दन्त और मदान्वित था उदधि से समुत्पन्न हुआ था।७।

तान्सर्वान्मध्यतः कृत्वा पुनश्चैव ममन्थिरे।
निर्मथ्यमानादुदधेर्निर्गतानि वहून्यथ॥
मदिरा विजया भृंगी तथा लशुनगृंजनाः।
अतीव उन्मादकरो धत्तूरः पुष्करस्तथा।९।
स्थापितानैकपद्यो नतीरेनदनदीपतेः ।
पुनश्चतेतत्रमहासुरेन्द्राममन्थुरब्धिसुरसत्तमैः सह।१०।
निर्मथ्यमानादुदधेस्तदासीत्सा दिव्यलक्ष्मीभुवनैकनाथा।
आन्वीक्षिकीं प्रह्मविदो वदन्ति तथा चान्ये मूलविद्यां गृणन्ति ।११।
ब्रह्मविद्यां केचिदाहुः समर्थाः केचित्सिद्धिमृद्धिमाज्ञामथाशाम्।
यां वैष्णवींयोगिनः केचिदाहुस्तथा च मायां मायिनी नित्य-युक्ताः।१२।
वदन्ति सर्वे केनसिद्धान्तयुक्तां यां योगमायां ज्ञानशक्त्यान्विता ये।१३।

दट्टशुस्तांमहालक्ष्मीमायान्तींशनकैस्तदा ।
गौरां च युवतींस्निग्धांपद्मकिंजल्कभूषणाम् ।१४।

उन सबको मध्य में करके फिर उन्होंने मन्थन किया था। इस तरह से निर्मथ्यमान सागर से बहुत से रत्न निकले थे। मदिरा, विजया, भृङ्गी, लहसुन, गृजञ्न (गाजर) और अत्यन्त उन्माद के करने वाला धतूरा तथा पुष्कर सागर से निकले थे। ये सब एक ही साथ नद-नदी पति अर्थात् सागर के तीर पर स्थापित किये गये थे। फिर वहाँ पर उन महान असुरेन्द्रों ने देवगणों के साथ मिलकर उस सागर का मन्थन किया था।८।९।१०। उस समय में मन्थन किए गये सागर से वह दिव्य लक्ष्मी प्रकट हुई थी जो भुवनों की एकमात्र स्वामिनी हैं। ब्रह्म वेत्ता इस देवी को आन्विक्षिकी कहा करते हैं तथा अन्य लोग इसी देवी को मूलविद्या इस नाम से ग्रहण किया करते हैं।११। कुछ लोग इस देवी को ब्रह्म विद्या कहते हैं और कुछ समर्थ लोग इसको ऋद्धि एवं सिद्धि कहते हैं तथा आशा भी कहा करते हैं। योगी लोग जिसको वैष्णवी देवी कहते हैं और कुछ नित्य युक्त मायी लोग इसको "माया"—इस नाम से पुकारते है। केनोपनिषत् के द्वारा प्रतिपाद्य सिद्धान्त (उमा शब्द वाच्य ब्रह्मविद्या) से युक्त जिस देवी को ज्ञान की शक्ति से समन्वित जो लोग हैं वे योगमाया कहते हैं।१२।१३। उस समय में आती हुई उस महालक्ष्मी को जो गौर वर्ण वाली, युवती, स्निग्धा और पद्मकिंजल्क के भूषणों वाली थी, धीरे से सबने देखा था अर्थात् सबको उस देवी के दर्शन हुए थे।१४।

आलोकितास्तथा देवास्तया लक्ष्म्या श्रियान्विताः।
सञ्जातास्तत्क्षणादेव राज्यलक्षणलक्षिताः ।१५।
दैत्यास्ते निःश्रिका जाना ये श्रियाऽनवलोकिताः ।१६।
निरीक्ष्यमाणा च तदा मुकुन्दं तमालनीलं सुकपोलनासम्।
विभ्राजमानं वपुषा परेण श्रीवत्सलक्ष्मं सदयावलोकम् ।१७।

दृष्ट्वा तदैव सहसा वनमालयान्विता लक्ष्मीर्गजादवततार सुविस्मयन्ती ।
कण्ठे ससर्ज पुरुषस्य परस्य विष्णोर्मालां श्रिया विरचितां भ्रमरैरुपेताम् ।१८।
वामाङ्गमश्रित्य तदा महात्मनः सोपाविशत्तत्र समीक्ष्य ता उभौ ।
सुराः सदैत्या मुदमापुरद्भुतां सिद्धाप्सरः किन्नरचारणाश्च ।१९।

उस सती महा लक्ष्मी देवी ने उन सब देवगणों—दानवों और सिद्धों–चारणों एवं पन्नगों को जिस तरह से माता अपने पुत्रों को देखा करती है उसी भाँति देखा था। लक्ष्मी देवी ने श्री से समन्वित देवों का अवलोकन किया था। उसी क्षण में वे सब देवगण राज्य लक्षणों से लक्षित हो गये थे ।१५। वे सब दैत्यगण जो श्री के द्वारा अवलोकित नहीं हुए थे निःश्रीक अर्थात् श्री से हीन हो गये थे ।१६। उस समय में भगवान् मुकुन्द को जो तमाल के समान नीलवर्ण वाले—सुन्दर कपोल और वासिका से युक्त, परमोत्तम वपु से विभ्राज मान, श्री वत्स के वक्षःस्थल में चिह्न वाले तथा दया पूर्वक सबकी ओर अवलोकन करने वाले थे ऐसे भगवान् का निरीक्षण करती हुई महालक्ष्मी तुरवा ही उसी समय में देखकर ही वनमाला से समन्वित होकर मुस्कराती हुई गज से नीचे उतर गई थी ओर वनमाला परम देव पुरुष भगवान् बिष्णु के कण्ठ में डाल दी थी जो कि श्री देवी के द्वारा विरचित की हुई और भ्रमरों के समूह से संयुत थी। उस समय में महान् आत्मा वाले भगवान् के वामाङ्ग में समाश्रित होकर वह देवी उपविष्ट हो गई थी। वहाँ पर उन दोनों देवों तथा दैत्यों के दलों ने उसको देखा था। सुर और असुर, सिद्ध, किन्नर, चारण और अप्सराओं के गण ने लक्ष्मी देवी के

सहित विष्णु का दर्शन करके परम आनन्द को प्राप्त किया था अर्थात् सबको अत्यन्त ही प्रसन्नता हुई थी ।१७।१८।१९।

सर्वेषामेवलोकानामैकपद्येन सर्वशः ।
हर्षो महानमभूत्तत्र लक्ष्मीनारायणागमे ।२०।
लक्ष्म्यावृतो महाविष्णुर्लक्ष्मीस्तेनैव सम्वृता ।
एवं परस्परं प्रीत्याह्यवलोकनतत्परौ ।२१।
शंखाश्च पटहाश्चैव मृदंगानकगोमुखाः ।
भेर्यश्च झर्झरीणां च स शब्दस्तुमुलोऽभवत् ।२२।
बभूव गायकानां च गायनं सुमहत्तक्ष ।
ततानि विततान्येव घनानि सुषिराणि च ।२३।
एवं वाद्यप्रभेदैश्चविष्णुं सर्वात्मना हरिम् ।
अतोषयन्सुगीतज्ञागन्धर्वाप्सरसांगणाः ।२४।
तथा जगुर्नारदतुम्बुरादयो गन्धर्वयक्षाः सुरसिद्धसंघाः ।
एंसेवमानाः परमात्मरूपं नारायणं देवमगाधबोधम् ।२५।

उस समय में लक्ष्मी नारायण के समागम के होने पर वहाँ पर समस्त लोकों को एक साथ महान् हर्ष हुआ था । महान् विष्णु लक्ष्मी देवी से आवृत थे और महा लक्ष्मी देवी उन विष्णु भगवान् से सम्वृत थीं । इस प्रकार से परस्पर में ये दोनों ही प्रीति पूर्वक एक दूसरे के समवलोकन करने में परायण हो रहे थे ।२०।२१। उस समय में चारों ओर शङ्ख, पटह, मृदङ्ग, आनक, गोमुख, भेरी, झर्झरी—इन सब प्रकार के वाद्यों की तुमुल ध्वनि हुई थी । उस आनन्द के काल में गायक गणों के गायन का सुमहान् शब्द हो रहा था । तत-वितत-घन और सुषिर प्रभृति वाद्यों के प्रभेदों के द्वारा सबने इस रीति से सर्वात्म भाव से श्री हरि विष्णु का परम तोष किया था । सुन्दर गीतों के ज्ञाता गन्धर्व, अप्सराओं के गण, नारद, तुम्बुर आदि, गन्धर्व, यक्ष, सुर, सिद्धों के समुदाय ने गान किया था और परमात्मा के स्वरूप वाले,

अगाध वोध से सुसम्पन्न देव नारायण की सबने परम सेवा की थी ॥२२-२५॥

११-अमृत विभाजन वर्णन

प्रणम्य परमात्मानं रमायुक्तं जनार्दनम् ।
अमृताथ ममन्थुस्ते सुरासुरगणाः पुनः ।१।
उदधेर्मथ्यमानाच्च निर्गतः सुहायशाः।
धन्वन्तरिरिति ख्यातो युवामृत्युञ्जयः परः।२।
पाणिभ्यां पूर्णकलशंसुधायाः परिगृह्य वै ।
यावत्सर्वे सुराः सर्वे निरीक्षन्तेमनोहरम् ।३।
तदा दैत्याः समं गत्वा हर्तु कामा बलादिव ।
सुधया पूर्णकलश धन्वन्तरिकरे स्थितम् ।४।
यावत्तरङ्गमालाभिरावृतोऽभुद्धिषक्तमः ।
शनैः शनैः समायातो दृष्टोऽसौ वृषपर्वणा ।५।
करस्थः कलशस्तस्य हृतस्तेन बलादिव ।
असुराश्च ततः सर्वे जगर्जु रतिभीषणाम् ।६।
कलशं सुधया पूर्णं गृहीत्वातेसमुत्सुकाः ।
दैत्याः पातालमाजग्मुस्तदादेवाभ्रमान्विताः ।७।
अनुजग्मुः सुसंनद्धायोद्धुकामाश्च तैः सह।
तदा देवान्समालोक्य बलिरेवमभाषत ।८।

महर्षि प्रवर लोमश ने कहा—रमादेवी से समन्वित परमात्मा भगवान् जनार्दन को प्रणाम करके फिर उन सुर और असुरों के गण ने अमृत की प्राप्ति करने के लिए समुद्र का मन्थन करना आरम्भ कर दिया था ।१। उस मध्यमान उदधि से सुन्दर महान् यक्ष से सम्पन्न, युवा मृत्यु पर विजय प्राप्त करने वाले परम "धन्वन्तरि"—इस नाम से विख्यात निर्गत हुए थे ।२। उनके दोनों हाथों में सुधा से परिपूर्ण कलश परिगृहीत हो रहा था। उनको सभी सुरगण बहुत ही सुन्दर के साथ

देख रहे थे। उसी समय में दैत्यगण एक साथ एकत्रित होकर बल पूर्वक उस अमृत के कलश को हरण करने की इच्छा वाले हो गये थे जो कि सुधा का कलश भगवान् धन्वन्तरि के कर में स्थित था।३४। वह भिषकों में श्रेष्ठ जब तक तरङ्गों की मालाओ से समावृत थे और बहुत ही धीरे-धीरे समायात हो रहे थे तभी तक वृषपर्वा ने उन को देख लिया था। उस इन्द्र ने उन धन्वन्तरि के हाथ में स्थित उस सुधा के कलश को बल पूर्वक ग्रहण कर लिया था। इसके पश्चात् सब असुर गण अत्यन्त भीषणता के साथ गर्जना करने लगे थे।५।६। उस सुधा से परिपूर्ण कलश को असुरों ने ग्रहण कर लिया था और बहुत ही उत्सुक होते हुए दैत्यगण पाताल में आ गये थे। उस समय में समस्त देवता श्रम युक्त हो गये थे। वे सभी उन दैत्यों के पीछे ही चले गये और उन दैत्यों के साथ युद्ध करने की इच्छा करने लगे थे। तब बलि ने उन देवों को देख कर इस प्रकार से उनसे कहा था।७।८।

बयं तु केवलं देवाः मुधया परितोषिताः।
शीघ्रमेव प्रगन्तव्यं भवद्भिश्च सुरोत्तमैः।९।
त्रिविष्टपं मुदायुक्तैः किमस्माभिः प्रयोजनम्।
पुराऽस्माभिः कृतंमैत्रभवद्भिः स्वार्थतत्परैः।
अघुना विदितं तत्तु नात्र कार्या विचारणा।१०।
एवं निर्भत्सितास्तेन बलिना सुरसत्तमाः।
यथागतेन मार्गेण जग्मुर्नारायणं प्रभुम्।११।
तं दृष्ट्वा विष्णुना सर्वे सुरा भग्नमनोरथाः।
आश्वासितावचोभिश्चनानानुनयकोविदैः।१२।
मा त्रासं कुरुतात्रार्थं आनयिष्यामि तां सुधाम्।
एवमाभाष्य भगवान्मुकुन्दोऽनाथसंश्रयः।१३।
स्थापयित्वा सुरान्सर्वांस्तत्रैव मधुसूदनः।
मोहिनीरूपमास्थायदैत्मानामग्रतोऽभवत्।१४।

तवाद्दैत्याः सुसंरब्धाः परस्परमथाब्रुवन् ।
विवादः सर्वदैत्यानाममृतार्थे तदाऽभवत् ।१५।

दैत्यराज बलि ने कहा—हे देवगणो ! हम तो केवल सुधा से ही परितोषित हो गये हैं । हे सुरोत्तमो ! आप लोगों को अब यहाँ से बहुत ही शीघ्र चले जाना चाहिए । आप लोग आनन्द से युक्त होकर अपने स्वर्गलोल में चले जाओ । अब हम लोगों से आपका क्या प्रयोजन है ? पहिले ही स्वार्थ में परायण होकर आप सबने हमारे साथ मैत्री का व्यवहार किया था । अब हमको वह सब ज्ञात हो गया है । इसलिए अब इस विषय से कुछ भी विचार नहीं करना चाहिए ।९।१०। इस प्रकार से बलि के द्वारा सब देवतागण बहुत फटकारे गये थे । फिर वे सब यथागत मार्ग के द्वारा परम प्रभु नारायण के समीप में चले गये थे । भगवान् विष्णु ने उन समस्त सुरों को भग्न मनोरथों वाले देखकर अनेक अनुनय से परिपूर्ण वचनों के द्वारा भगवान् ने उद सबको समाश्वासन दिया था ।११।१२। हे देवगणो ! इस विषय में आप लोग अपने मन में किसी भी प्रकार का त्रास मत करो । मैं उस सुधा के कलश को ले आऊँगा । इस तरह से अनाथों को आश्रय प्रदान करने वाले भगवान् मुकुन्द ने उन सब देवताओं से कहा था । भगवान् मधुसूदन ने वहीं पर समस्त सुरों को स्थापित करके अपना एक मोहिनी का रूप धारण किया और उन दैत्यों के सामने जाकर स्थित हो गये थ । तब तक वे सब दैत्यगण सुसंरब्ध होकर परस्पर में बातचीत कर रहे थे । उस समय में सब दैत्यों का उस अमृत के लिए बड़ा भारी विवाद हो गया था ।१३।१४।१५।

एवं प्रवर्तमानेतु मोहिनीरूपमाश्रिताम् ।
दृष्ट्वा योषां तदा दैवात्सर्वभूतमनोरमाम् ।१६।
विस्मयेन समाविष्टा बभूवुस्तृपितेक्षणाः ।
तां संमान्य तदा दैत्यराजो बलिरुवाच ह ।१७।

सुधा त्वयाभिभक्तव्या सर्वेषां गतिहेतवे ।
शीघ्रत्वेन महाभागे कुरुष्व वचनं मम ।१८।
एवमुक्ता ह्यवाकेदं स्मयमाना बलिंप्रति ।
स्त्रीणांनैवचविश्वासः कर्तव्योहिविपाश्चिता ।१९।
अनृतंसाहसं माया मूर्खत्वमतिलोभता ।
अशौचं निर्घृणत्वंचस्त्रीणांदोषा स्वभावजाः ।२०।
निःस्नेहत्वच विज्ञेयं धूर्तत्वंचैव तत्त्वतः ।
स्वस्त्रीणांचैवविज्ञेयादोषानास्त्यत्र संशयः ।२१।

ऐसा होने पर उसी समय में मोहिनी के स्वरूप में समाश्रित—सब प्राणियों के लिए परम मनोरमा उस स्त्री को दैवात् देखकर सभी दैत्यगण अत्यन्त विस्मय को प्राप्त हो गये थे और सब पियासित नेत्रों वाले होकर स्थित हो गये थे। उस समय में दैत्यराज बलि ने उस मोहिनी का बड़ा भारी सम्मान किया था और उससे कहा था—दैत्यराज बलि ने कहा—आपको इन सबकी भलाई के लिये इस सुधा का विभाजन कर देना चाहिए। हे महाभागे! आप बहुत ही शीघ्रता से मेरे इस वचन को स्वीकृत कर लीजिए।१६।१७।१८। जब इस प्रकार से देवी मोहिनी से कहा गया तो वह मुस्कराती हुई दैत्यराज बलि से बोली—विद्वान् पुरुष को स्त्रियों का कभी भी विश्वास नहीं करना चाहिये। क्योंकि स्त्रियों के अनृत (मिथ्याभाषण), साहस, माया, मूर्खता, अत्यन्त लालच, अशौच, निर्घृणत्व ये स्वभाव सिद्ध दोष हुआ करते हैं। स्नेह का न होना और तात्विक रूप से धूर्त्तता ये दोष भी स्त्रियों के जानने के योग्य हुआ करते हैं। ये दोष तो अपनी स्त्रियों में भी समझ लेने चाहिए—इस विषय में लेशमात्र भी संशय नहीं है।१९।२०।२१।

यथैव श्वापदानांचधृकाहिंसापरायणाः ।
काका यथाण्डजानांचश्वापदानांचजम्बुकाः ।

धूर्ता तथा मनुष्याणां स्त्री ज्ञेया सततं बुधैः ।२२।
मया सह भवद्भिश्च कथं सख्यं प्रवर्तते ।
सर्वथाऽत्र न विज्ञेयाः के यूयं चैव काह्यकम् ।२३।
तस्माद्भवद्भिः संचिन्त्य कार्याकार्यविचक्षणः ।
कर्तव्यंपरयाबुद्ध्याप्रायातासुरसत्तमाः ।२४।
यास्त्वया कथितानार्यो ग्राम्या ग्राम्यजनप्रियाः ।
तासां त्वं कथ्यमानानां मध्यगा नासि शोभने ! ।२५।
किं त्वया बहुनोक्तेन कुरुष्व वचनंहितः ।
सा मोहिनीद प्रोवाच बलेर्वाक्यादनन्तरम् ।२६।
करिष्यामि च ते वाक्यं सूक्तासूक्तमिति प्रभो ! ।२७।
अद्यामृतं च सर्वेषां विभजस्व यथातथम् ।
त्वया दत्तं च गृहल्लीमः सत्यं सत्यंवदासिते ।२८।
एवमुक्ता तदादेवीमोहिनीसर्वमङ्गला ।
उवाचाऽथासुरान्सर्वान्प्रोचर्यल्लौकिकीस्थितिम् ।२९।

जिस प्रकार से श्वपदों (चाणयों) के मध्य में वृक (भेड़िया) हिंसा परायण हुआ करते हैं—कौए अण्डजों के मध्य में हिंसा परायण होते हैं तथा श्वपदों में जम्बुक (शृगाल) हिंसक वृत्ति वाले होते हैं ठीक उसी भाँति मनुष्यों में बुध पुरुषों को स्त्रियों को निरन्तर समझ लेना चाहिए ।२२। मेरे साथ आपका मित्र भाव किस तरह से प्रवृत्त रहेगा ? इस विषय में हम लोग सब प्रकार से जानने के योग्य नहीं हैं । कौन लोग आप हैं और कौन मैं हूँ ? इसलिए कार्याकार्य में परमकुशल आप लोगों को बहुत ही अच्छी तरह से विचार करके पराबुद्धि के द्वारा ही करना चाहिए । हे असुरश्रेष्ठो आप जाइये ।२३।२४। दैत्यराज बलि ने कहा—हे देवी ! आपने जो नारियों के विषय में दोष आदि के बावत कहा है वे ग्राम्य नारियाँ ही होती हैं और ग्राम्य जनों की ही प्रिय

हुआ करती हैं। आप उन कही हुई नारियों के मध्य में रहने वाली हे शोभने ! नहीं हैं।२५। आपके ऐसे अत्यधिक कथन से क्या लाभ है ? आप तो मेरे निवेदित वचन को ही करिये। वह मोहिनी दैत्यराज बलि के वाक्य के अनन्तर यह वचन बोली—हे प्रभो ! आपके सूक्ता-सूक्त वाक्य का मैं अवश्य ही पालन करूँगी।२६।२७। बलि ने कहा—आज आप इस अमृत को यथातथा अर्थात् ठीक-ठीक रूप से सबको विभाजित कर दीजिएगा। आपके द्वारा दिये हुए इस अमृत को हम सब लोग ग्रहण कर लेंगे। यह बात हम बिल्कुल आपसे सत्य-सत्य कह रहे हैं। इस प्रकार से उस समय में कही हुई सर्गं मङ्गला मोहिनी देवी समस्त असुरों से लौकिक स्थिति को रोचित करती हुई बोली। २८।२९।

यूयं सर्वेकृतार्थाश्च जातादैवेनकेनचित् ।
अद्योपवाससंयुक्ता अमृतस्याधिवासनम् ।३०।
क्रियतामसुराः श्रेष्ठाः शुभेच्छाकिञ्चिदस्तिवः ।
श्वोभूते पारणंकुर्याद्व्रतार्चनरतिश्च वः ।३१।
न्यायोपार्जितवित्तेन दशमांशेन धीमता ।
कर्तव्यो विनियोगश्च ईशप्रीत्यर्थहेतवे ।३२।
तथेति मत्वा ते सर्वे यथोक्तदेवमायया ।
चक्रुस्तथैव दैतेया मोहिता नातिकोविदाः ।३३।
मयासुरेण च तदा भवनानि कृतानिवै ।
मनोज्ञानि महार्हाणि सुप्रभाणि महान्तिव ।३४।
तेषूपविष्टास्ते सर्वे सुस्नाताः समलङ्कृताः ।
स्थापयित्वा सुसंरब्धाः पूर्णं कलशमग्रतः ।३५।
रात्रौ जागरणं सर्वैः कृतं परमया मुदा ।
अथोषसि प्रवृत्ते च प्रातः स्नानयुता भवन् ।३६।

असुरा बलिमुख्याश्च पङ्क्तिभूता यथाक्रमम् ।
सर्वमावश्यककृत्वातदा पानरताभवन् ।३७।

मोहिनी के स्वरूप को धारण करने वाले श्री भगवान ने कहा—आप सब लोग किसी दैव के द्वारा परम सफल हो गये हैं। हे श्रेष्ठ असुर गणो ! यनि आपकी कुछ शुभेच्छा है तो आज आप लोग सब उपवास से संयुक्त होओ अर्थात् उपवास करो और इस प्राप्त हुए अमृत का अधिवासन करो। कल प्रातःकाल होने पर इस उपवास का पारण करना चाहिए। आप लोगों को व्रतार्चन की रति समुत्पन्न होगी। धीमान् पुरुष के द्वारा ईश प्रीति के लिए न्याय से समुपार्जित वित्त के दशम अंश से विनियोग करना चाहिए ।३०।३१।३२। उन सब ने 'ऐसा ही किया जायेगा'—इस तरह से जो कुछ भी देव माया ने कहा था उसको मान लिया था। उन दैत्यों ने मोहित होते हुए वैसा ही सब कुछ किया था क्योंकि वे अत्यन्त कोदित तो थे नहीं ।३३। उस समय में मयासुर के द्वारा परम सुन्दर-सुन्दर प्रभा से समन्वित, विशाल एवं बहुमूल्य भवनों की रचना की गई थी। उन भवनों में वे सब भली भाँति स्नानादि करके समलङ्कृत होते हुए उपविष्ट हो गये थे। सुसंरब्ध उन्होंने सुधा से परिपूर्ण कलश को आगे स्थापित करके रात्रि में सबने बहुत ही अधिक प्रसन्नता के साथ जागरण किया था। इसके अनन्तर प्रातःकाल के प्रवृत्त होने पर सब लोगों ने स्नानादि किया था। जिनमें बलि प्रधान था उन सब असुरों ने अपनी पङ्क्ति यथाक्रम से बना ली थी। सभी कुछ आवश्यक कर्म करके वे सब अमृत के पान करने के लिए निरत हो गये थे ।३४–३७।

करस्थेन तदा देवी कलशेन विराजिता ।
शुशुभे परया कान्त्या जगन्मङ्गलमङ्गला ।३८।
परिवेषधराः सर्वे सुरास्तेह सुरान्तिकम् ।
आगतास्तत्क्षणादेव यत्र ते ह्यसुरोत्तमाः ।
तान्दृष्ट्वा मोहिनी सद्य उवाच प्रमदोत्तमा ।३९।

एते ह्यतिथयो ज्ञेया धर्मसर्वस्वसाधनाः ।
एभ्योदेयं यथाशक्त्या यदि सत्यंवचोमम ।
प्रमाण भवतां चाद्य कुरुध्वं मा विलम्बथ ।४०।
परेषामुपकारं च ये कुर्वन्तिस्वशक्तितः ।
धन्यास्ते चैव विज्ञेयाः पवित्रालोकपालकाः ।४१।
केवलात्मोदरार्थाय उद्योगंये प्रकुर्वते ।
ते क्लेशभागिनो ज्ञेया नात्रकार्या विचारणा ।४२।

उस समय में वह मोहिनी देवी अपने कर में स्थित अमृत के कलश से शोभायमान हो रही थी । वह जगन्मङ्गलों के भी परम मङ्गल स्वरूपिणी अपनी परमाधिक कान्ति से सुशोभित हो रही थी । परिवेष को धारण करने वाले वे समस्त देवगण भी उन असुरों के ही समीप में उसी क्षण में समागत हो गये थे जहाँ पर वे असुर श्रेष्ठ विराजमान हो रहे थे । उनको देखकर वह प्रमदाओं में परमोत्तमा मोहिनी तुरन्त ही बोली थी ।३८।३९। मोहिनी ने कहा—ये सभी धर्म्म सर्वस्व के साधन करने वाले अतिथिगण हैं । इनके लिए भी यथाशक्ति कुछ अवश्य ही देना चाहिये । यदि मैं यह वचन सर्वथा सत्य कह रही हूँ तो अब आज आप लोग ही सब कुछ करने के लिए समर्थ हैं जो भी कुछ आप चाहें वैसा ही करिये । अब इसमें विलम्ब मत करिये ।४०। जो लोग अपनी शक्ति से दूसरों का उपकार किया करते हैं वे ही इस विश्व में परम धन्य हैं । ऐसे ही लोगों को परम पवित्र और लोकों के पालन करने वाले समझना चाहिये ।४१। जो केवल अपने ही उदर के भरने के लिए उद्योग किया करते हैं, वे इस जगत् में क्लेशों के भोगने वाले ही हुआ करते हैं ऐसा ही जानना चाहिये । इस विषय में बिल्कुल विचार नहीं करना चाहिये ।४२।

तस्माद्विभजनं कार्यं मयैतस्यशुभव्रताः ।
देवेभ्यश्च प्रयश्चध्वं यद्धि चात्मप्रियाप्रियम् ।४३।

इत्येक्ते वचने देव्यातथाचक्र रतन्द्रिता: ।
आह्वायामासुरस्सुरा: सर्वान्देवान्सवासवान् ।४४।
उपविष्टाश्चते सर्वे अमृतार्थंचभोद्विजा: ।
तेषूपविश्यमानेषु ह्यु वाच परमं वच: ।
मोहिनी सर्व धर्मज्ञा असुराणां स्वयन्निव ।४५।
आदौ ह्यभ्यागता: पूज्या इति वै वैदिकी श्रु ति: ।४६।
तस्माद्यूयं वेदपरा: सर्वे देवपरायणा: ।
ब्रु वन्तु त्वरितेनैव आदौ केषां ददाम्यहम् ।
अमृतं हि महाभागा बलिमुख्या वदन्तु भो: ।४७।
बलिनोक्तातदादेवी यत्ते मनसिरोचते ।
स्वामिनी त्वं न सन्देहो ह्यस्माकसुन्दरानने ।४८।
एवं संमानिता तेन बलिना भावितात्मना ।
परिवेषणकार्यार्थि कलशं गृह्य सत्वरा ।४९।

हे शुभ व्रत वालो ! मुझे तो इस अमृत का विभाजन सभी के लिए कर देना चाहिये । जो भी जपना प्रिय तथा अप्रिय भी हो उसको दैवों के लिए भी दो । इस वचन के कहने पर जोकि देवी मोहनी ने कहा था, उन असुरों ने अतन्द्रित होकर वैसा ही स्वीकार कर लिया था और फिर असुरों ने उन सब सुरगणों को भी जिनसें इन्द्रदेव भी विद्यमान थे वहीं पर बुला लिया था ।४३।४४। हे द्विजगणो ! उस अमृत के पान करने के लिए वे सभी वहाँ पर उपविष्ट हो गये थे। उन सबके वहाँ पर बैठ जाने पर सब प्रकार के धर्म्म के जानने वाली मोहिनी ने असुरों की ओर मुस्कराते हुए यह परम वचन कहा था—।४५। मोहिनी ने कहा—वैदिकी श्रु ति का यही आदेश है कि सबके आदि में अभ्यागत गणों का पूजन करना चाहिये ।४६। इसलिए आप सभी लोग वेदों को मानने में परायण हैं और आप सब देव परायण भी हैं । अतएव अब आप सब लोग मुझे अति शीघ्रता से बतलाइये कि सबसे प्रथम मैं किन को इस अमृत को दूँ । हे महाभाग

वालो ! दैत्यराज बलि जिनमें परम प्रधान हैं वे सभी मुझे अब बतलाइये ।४६। उस समय में इस प्रकार से कहने पर दैत्यराज बलि ने मोहिनी से कहा था—हे सुन्दरानने ! जो भी आपको अपने मन में अच्छा लगे वैसा ही करिये । आप तो हम सबकी स्वामिनी हैं । इसमें किञ्चिन्मात्र भी सन्देह नहीं । इस तरह से भावितात्मा बलि के द्वारा सम्मानित हुई उस मोहिनी देवी ने परिवेषण करने के लिए शीघ्र ही उस सुधा के कलश को ग्रहण कर लिया था ।४७।४८।४९।

तस्मान्नरेन्द्रकरभोरुलसद्दुकूला
श्रोणीतटालसगतिर्मदविह्वलाङ्गी ।
सा कूजिती कनकनूपुरसिञ्जितेन
कुम्भस्तनी कलशपाणिरथाविवेश ।५०।
तदा तु देवी परिवेषयन्ती स मोहिनी देवगणाय साक्षात् ।
ववर्ष देवेषु सुधारसं पुनः पुनः सुधाहाररसामृतं यथा ।५१।
पुनश्च ते देवगणाः सुधारसं दत्तं तया परया विश्वसूत्या ।
देवेन्द्रमुख्याः सह लोकपाला गन्धर्वयक्षाप्सरसां गणाश्च ।५२
सर्वे दैत्या आसनस्थास्तदानीं
चिन्तान्विताः क्षुधया पीड़िताश्च ।
तूष्णींभूता बलिमुख्या द्विजेन्द्रा
मनस्विनो ध्यानपरा बभूवुः ।५३।
ततस्तथविधान्दृष्ट्वा दैत्यास्तान्मोहमाश्रितान् ।
तदाराहुश्चकेतुश्चद्वावेतौ दैत्यपुङ्गवौ ।५४।
देवानां रूपमास्थाय अमृतार्थत्वरान्वितौ ।
उपविष्टौ तदा पङ्क्त्यांदेवानाममृतार्थिनौ ।५५।
यदाऽमृतं पातुकामो राहुः परमदुर्जयः ।
कन्द्रार्काभ्यां प्रकथितो विष्णोरमिततेजसः ।५६।

तदा तस्य शिरच्छिन्नं राहोर्दुर्विग्रहस्य च ।
शिरो गगनमापेदे कबन्धं च महीतते ।
भ्रममाणं तदा ह्याद्रींश्चूर्णयामास वै तदा ।५०।

